## ॥ श्रीदत्तात्रेय स्तोत्रम् ॥

दत्तात्रेयं महात्मानं वरदं भक्तवत्सलं
प्रपन्नार्तिहरं वंदे स्मर्तृगामी स माऽवतु॥ १॥
दीनबंधु कृपासिंधु सर्वकारणकारणं।
सर्वरक्षाकरं वंदे स्मर्तृगामी स माऽवतु॥ २॥
शरणागतदीनार्तपरित्राणपरायणं।
नारायणं विभुं वंदे स्मर्तृगामी स माऽवतु॥ ३॥
सर्वानर्थहरं देवं सर्वमंगलमंगलम्।
सर्वक्लेशहरं वंदे स्मर्तृगामी स माऽवतु॥ ४॥
शोषणं पापपंकस्य दीपनं ज्ञानतेजसः।
भक्ताभीष्टप्रदं वंदे स्मर्तृगामी स माऽवतु॥ ५॥
सर्वरोगप्रशमनं सर्वपीडानिवारणम्।
तापप्रशमनं वंदे स्मर्तृगामी स माऽवतु॥ ६॥
ब्रह्मण्यं धर्मतत्वज्ञं भक्तकीर्तिविवर्धनम्।
आपदुद्धरणं वंदे स्मर्तृगामी स माऽवतु॥ ७॥
जन्मसंसारबंधघ्नं स्वरूपानंददायकम्।
निःश्रेयसप्रदं वंदे स्मर्तृगामी स माऽवतु॥ ८॥
जयलाभयशः कामदातुर्दत्तस्य यः स्तवम्।
भोगमोक्षप्रदस्येमं प्रपठेत्स कृती भवेत॥९॥
॥ इति श्रीमत् परमहंस परिव्राजकाचार्य
श्रीवासुदेवानंदसरस्वतीविरचितं श्रीदत्तात्रेयस्तोत्रं संपूर्णम्॥

## श्रीदत्ताचे ध्यान

दिगंबरं भस्मविलेपितांगं।
बोधात्मकं मुक्तिकरं प्रसन्नं॥
निर्मानसं श्यामतनुं भजेऽहं
दत्तात्रेयं ब्रह्म समाधियुक्तम्॥